श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

# ॥ श्री वेगासेतुस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेगासेतुस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

एकं वेगवतीमध्ये हस्तिशैले च दृश्यते।
उपायफलभावेन स्वयं व्यक्तं परं महः॥ 1 ॥

ईष्टे गमयितुं पारम् एष सेतुरभङ्गुरः।
यत्र सारस्वतं स्रोतो विश्राम्यति विशृङ्खलम्॥ 2 ॥

जयति जगदेकसेतुः वेगवतीमध्यलक्षितो देवः।
प्रशमयति यः प्रजानां प्रथितान् संसारजलधिकल्लोलान्॥ 3 ॥

विभातु मे चेतसि विष्णुसेतुः वेगापगावेगविघातहेतुः।
अम्भोजयोनेर्यदुपज्ञमासीत् अभङ्गरक्षा हयमेधदीक्षा॥ 4 ॥

चतुराननसप्ततन्तुगोप्ता सरितं वेगवतीमसौ निरुन्धन्।
परिपुष्यति मङ्गळानि पुंसां भगवान् भक्तिमतां यथोक्तकारी॥ 5 ॥

श्रीमान् पितामहवधूपरिचर्यमाणः
    शेते भुजङ्गशयने स महाभुजङ्गः।
प्रत्यादिशन्ति भवसञ्चरणं प्रजानां
    भक्तानुगन्तुरिह यस्य गतागतानि॥ 6 ॥

प्रशमितहयमेधव्यापदं पद्मयोनेः
    श्रितजनपरतन्त्रं शेषभोगे शयानम्।

शरणमुपगताः स्मः शान्तनिःशेषदोषं
शतमखमणिसेतुं शाश्वतं वेगवत्याः ॥ 7 ॥

शरणमुपगतानां सोऽयमादेशकारी
शमयति परितापं संमुखः सर्वजन्तोः।
शतगुणपरिणामः सन्निधौ यस्य नित्यं
वरवितरणभूमा वारणाद्रीश्वरस्य ॥ 8 ॥

काञ्चीभाग्यं कमलनिलयाचेतसोऽभीष्टसिद्धिः
कल्याणानां निधिरविकलः कोऽपि कारुण्यराशिः।
पुण्यानां नः परिणतिरसौ भूषयन् भोगिशय्यां
वेगासेतुर्जयति विपुलो विश्वरक्षैकहेतुः ॥ 9 ॥

वेगासेतोरिदं स्तोत्रं वेङ्कटेशेन निर्मितम्।
ये पठन्ति जनास्तेषां यथोक्तं कुरुते हरिः ॥ 10 ॥

॥ इति श्री वेगासेतुस्तोत्रं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥